# Chittasantosha Trimshika by Nagarjuna

# નાગાર્જુનકૃતા ચિત્તસન્તોષત્રિંશિકા

## Document Information

Text title : Chittasantosha Trimshika by Nagarjuna

File name : chittasantoShatriMshikA.itx

Category : shiva, triMshikA

Location : doc_shiva

Author : Nagarjuna

Transliterated by : Girdhari Lal Koul

Proofread by : Girdhari Lal Koul, Ruma Dewan

Latest update : April 2, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 2, 2022

*sanskritdocuments.org*

Chittasantosha Trimshika by Nagarjuna

# નાગાર્જુનકૃતા ચિત્તસન્તોષત્રિંશિકા

લોકોત્તરાનુભવસસ્મિતઘૂર્ણમાન-
    સ્વાનન્દ સુન્દર વિનિર્મલ નિર્નિમેષા ।
યત્સ્ફારતઃ પશુરપીશ્વરતામુપૈતિ
    સા કાપિ દૃગ્વિજયતે ગુરુપુઙ્ગવાનામ્ ॥ ૧॥

દિષ્ટ્યા ભવાનલશિખા શત તાપ તપ્તં
    જન્માટવીષુ વિષમાસુ કદર્થિતં યત્ ।
ચેતસ્તદેતદધુનામલ ચિત્સુધાબ્ધિ-
    મધ્યે નિમગ્નમસમાં ભજતે પ્રશાન્તિમ્ ॥ ૨॥

વ્યામૂઢમન્ધમિવ સંશયદોષદુષ્ટં
    ચેતો યદેતદ ભવદ્ભવદુઃખ પાત્રમ્ ।
જાતં તદદ્ય ગુરુપાદસરોજ સેવા-
    સઞ્જાત નિર્મલવિબોધ મહાપ્રકાશમ્ ॥ ૩॥

સઙ્કોચમાશ્રિતવતો નિબિડં વિમોહા-
    ત્યસ્યાભવદ્ભયમિહેન્દ્રિયપર્વગેભ્યઃ ।
ચેતસ્તદાપ્ય વિમલોર્જિત સંવિદાજ્ઞાં
    નિઃશઙ્કમદ્ય રમતે વિષયાટવીષુ ॥ ૪॥

કન્દર્પબાણવિષમં હરિણેક્ષણાભિઃ
    પીતં હતં કવલિતં મુષિતં યદાસીત્ ।
તત્પાત્રતામુપગતં પરમોક્ષલક્ષ્મી
    પ્રેમામૃતાપ્લુતકટાક્ષ પરમ્પરાણાત્ ॥ ૫॥

ક્લિષ્ટં યદેતદભવજ્જપકષ્ટયોગ
    પ્રાણપ્રવાહવિનિરોધકદર્થનાભિઃ ।
ચેતસ્તદદ્ય પરમાદ્વયસામરસ્ય
    સઞ્જાત સમ્મદર સાસવમત્તમાસ્તે ॥ ૬॥

યો ભેદતીવ્ર શિશિરપ્રસરોપઘાત-
    ભીતો મનો મધુકરો હતશક્તિરાસીત્ ।
આસાદ્ય સોઽદ્ય શિવધામમધું સદાસ્તે
    સંવિલ્લતાકુસુમસૌરભપાનમત્તઃ ॥ ૭॥

ત્યક્ત સ્વતન્ત્ર નિજરૂપમહાપ્રભાવં
    યત્કર્મ બિન્દુધરણીષુ વિલીનમાસીત્ ।
સ્વચ્છ પ્રભાપ્રસર પૂરિત સર્વલોકં
    ચેતશ્ચિદમ્બરપદેન તદસ્યમાતિ ॥ ૮॥

યત્નેન વાઞ્છિતમનલ્પ વિકલ્પજાલ
    વિઘ્નૈસ્તિરસ્કૃતમવાપન યત્પ્રવેશમ્ ।
દુર્ભેદ ભિન્નવિષમાર્ગ લભિન્નમાર્ગાં
    ચેતસ્તદસ્ય રમતે શિવમન્દિરાન્તઃ ॥ ૯॥

યોગવ્રતાદિ નિયમૈ રુપસે વિતાપિ
    નાવાપ દર્શનપથં કિલ યસ્ય જાતુ ।
સંવિત્પ્રિયાસુભગમૂર્જિત ભાગ્યસમ્પત્-
    ચેતસ્તદસ્ય ન જહાતિ મુહૂર્તમેકમ્ ॥ ૧૦॥

દુઃખૈકસાર ઇતિ ભીમ ઇતિ પ્રયત્નાત્-
    સંસાર એષ કિલ યસ્ય બભૂવ હેયઃ ।
દિષ્ટ્યા સ એવ પરચિદ્રસસામરસ્ય
    સઞ્જીવિતઃ શ્રયતિ તસ્ય વિમુક્તિ સામ્યમ્ ॥ ૧૧॥

તૃષ્ણા કરાલકરવાલ વિલુપ્યમાનં
    યદ્વિસ્મૃતાત્મ વિભવં કૃપાણં બભૂવ ।
ઉચ્ચૈરકિઞ્ચન તથાપિ તદદ્ય ચેતઃ
    સ્વાત્મા વમર્શ પરહર્ષ મુદારમાસ્તે ॥ ૧૨॥

કસ્યોર્જિતસ્ય સુકૃતસ્ય ફલં તદેતત્-
    પુણ્યોદયસ્તવ કુતોઽયમનન્યલભ્યઃ ।
સંવિચ્છ્રિયા ગલિતભેદ વિકલ્પયા ય-
    દેકં મુહૂર્તમપિ નૈવ વિમુચ્યસે ત્વમ્ ॥ ૧૩॥ (યદેકં)

વર્તામહે ક્વચન નામ ન ચિત્ત દિષ્ટયા

વર્ધામહે વયમહો મુદિતા ભવામઃ ।
યત્ત્વાં સખે પરનિરુત્તર શૈવસમ્પત્-
સમ્ભોગ મન્થરતરં પરિલોકયામઃ ॥ ૧૪॥

ધ્યાનેऽર્ચનેऽપિ ન કદાચન કાઞ્ચનાપિ
કુત્રાપિ નિર્વૃતિ દશાં વત યન્ન લેભે ।
દિષ્ટ્યા નિમગ્નમપિ સંવ્યવહારમધ્યે
ચેતસ્તદદ્ય ન વિમુઞ્ચતિ પારિપૂર્ણ્યમ્ ॥ ૧૫॥

સર્વેષુ ચિત્તમધુપો વિષયદ્રુમેષુ
બભ્રામ યઃ સતતમસ્તમિતાભિલાષઃ ।
દૈવાદવાપ્ય પરમેશ્વરપારિજાતં
તૃપ્તો વિલીન ઇવ મુઞ્ચતિ ચઞ્ચલત્વમ્ ॥ ૧૬॥

યૈરિન્દ્રિયૈરપિ વશીકૃતશક્તિ ચેતઃ
પૂર્વં કદર્થિતમભૂર હિતૈરિ વોચ્ચૈઃ ।
સ્વચ્છા નિકેત પરચિદ્રસ સંવિભક્તૈઃ
દિષ્ટ્યાદ્ય તૈરનુચરૈરિવ રાજસે ત્વમ્ ॥ ૧૭॥

ચિન્તાતતાન કરુણં પ્રલલાપ પૂર્વં
યત્સઙ્કુચત્સ્થિતિ ભયં રવિજાદ્વિચાર્ય ।
ચેતસ્તદદ્વયમિદં નિજરૂપમીક્ષ્ય
દિષ્ટ્યાદ્ય નિર્ભયમ મન્દમુદાત્તમાસ્તે ॥ ૧૮॥

નિત્યં યદેતદ ભવદ્વિફલપ્રયાસં
હેવાકદુર્લલિતમ પ્રથિતાત્મભાવમ્ ।
સંવિત્સુધારસ ચમત્કૃતિ ઘૂર્ણમાનં
દિષ્ટ્યા તદદ્ય નિતરાં સ્પૃહણીયમાસ્તે ॥ ૧૯॥

ચિન્તાશતાકુલતરં ન ગતિં કદાચિત્-
ભીતં ભવાદભજતૈકમપિ ક્ષણં યત્ ।
ચેતશ્ચિદાત્મકમિદં સકલં વિલોક્ય
સુપ્તપ્રબુદ્ધમિવ નિર્વૃત રૂપમાસ્તે ॥ ૨૦॥

વન્દામહે કિમુ નુમઃ કિમુ ગૌરવેણ
હર્ષેણ ચિત્ત કિમુ નામ નિપીડયામઃ ।
સમ્પ્રાપ્ત દુર્લભ મહોદય શૈવસમ્પત્-

ત્વાં કૌતુકેન કિમુ મિત્ર વિલોકયામઃ ॥ ૨૧॥

આપૃચ્છતામિયમનાદિ ઘનપ્રબન્ધ
સ્નેહાનુ વિદ્ધહૃદયાહૃદયાદ્ય માયા ।
સંસેવ્યતાં સુભગ શૈવપદ પ્રવેશ
સંપ્રાપ્ત દુર્લભ મહોદય શૈવસમ્પત્ ॥ ૨૨॥ (મહોદય મુક્તિ લક્ષ્મીઃ) (સમ્પતમ્?)

કિં બ્રૂમહેઽત્ર ભવતે સુકૃતેન સત્ય (સત્યે)
સર્વાશિષામ વિષય નનુ વર્તસે ત્વમ્ ।
યત્કારણાતિગત નિર્મલ નિર્વિકલ્પ
સ્વચ્છન્દ શઙ્કરપદે ભજસેઽનુરાગમ્ ॥ ૨૩॥

ચિત્રં તદેતદસમં યદભૂત્સુખેષુ
પ્રાપ્તેષુ નિર્વૃતિદશમનુવર્તમાનામ્ ।
દુઃખેષુ દુસ્સહતરેષ્વપિ ચિત્તમધ્ય
પૂર્ણ પ્રમોદ રસ નિર્ભરમેતદાસ્તે ॥ ૨૪॥

વિશ્વં નિગીર્ય સહસા કવલં વિધાય
કાલં પ્રશાન્ત ગગનોપમ દિવ્યમૂર્તિઃ ।
યા રાજતે નિરુપમામૃત પૂરપૂર્ણા
સા કાપિ ખેચર ગતિર્જયતિ ત્વદીયા ॥ ૨૫॥

તે કારણાધિપતયઃ પ્રલયં પ્રયાન્તિ
યસ્મિન્મહાવટતટ વિષમે ગભીરે ।
શક્તિર્નિજં વપુરપિ પ્રસભં જહોતિ
તદ્ધામ સંશ્રયસિ વીરવર ત્વમેકમ્ ॥ ૨૬॥

વિદ્યુદ્વિલાસ ચપલે વિભવે નતાઙ્ગી
ભ્રૂભઙ્ગભઙ્ગુરતરેઽપિ ચ જીવિતેઽસ્મિન્ ।
ચિત્ત ત્વયૈવ વિજિતં શ્રયતા વિનાશિ
દિગ્દેશકાલકલનારહિતં પદં તત્ ॥ ૨૭॥

સ્વસ્ત્યસ્તુ તે સ્વરવિકસ્વરસમ્પ્રદાય (તેઽમ્બરવિકસ્વર)
સમ્પ્રાપ્ત શઙ્કરપદોદિતસમ્મદાય ।
દુર્વારસંસ્મૃતિઅશાસ્વપિ નિર્વિકાર
નિત્યોદિતાત્મ વિભવાય ભવાભવાય ॥ ૨૮॥

સ્વચ્છન્દ નિર્મલ પદોદિત નિર્નિકેત
    સંવિત્સુધારસચમત્કૃતિ નિર્ભરોઽસિ ।
દિષ્ટ્યાદ્ય સદ્ગુરુમુખામ્બુજમદ્ય લબ્ધા-
    નુશ્ચાર્ય ચારકથનોદય વિસ્મિતોઽસ્મિ ॥ ૨૯॥

ભવમરુભુવિશ્રાન્તો મોહાત્ય એષ મનોઽધ્વગો
    વિષમ વિષય પ્રોધ્યત્તૃષ્ણાનિવેશ વશીકૃતઃ ।
શિવપદસુધાસિન્ધું દૈવાદવાપ્ય સ સાદરં
    કિમપિ સુખિતં મજ્જં મજ્જં નિમજ્જતિ સામ્પ્રતમ્ ॥ ૩૦॥

નિરાવરણ ચિદ્વ્યોમ પરમામૃતનિર્ભરઃ ।
નાગાભિધાનં તદિદં ચિત્તસન્તોષકં વ્યધાત્ ॥ (નાગાર્જુનો વ્યધાદેનાં ચિત્તસન્તોષત્રિંશિકામ્)

ઇતિ શ્રીનાગવિપશ્ચિદ્વિરચિતા ચિત્તસન્તોષત્રિંશિકા સમાપ્તા ।
(વિપશ્ચિદ્વર-નાગાર્જુનવિરચિતા)

Encoded and proofread by Girdhari Lal Koul, Ruma Dewan

*Chittasantosha Trimshika by Nagarjuna*
pdf was typeset on April 2, 2022

Please send corrections to *sanskrit@cheerful.com*